A First EPQRST Journal-www.jahnavisanskritejournal.com, Issue-17th, Vol.-V, 14.1.14

ISSN 976-8645

# वाक्यपदीयकारो भर्तृहरिः तन्मतेन कालशक्तिश्च

मीरा शर्मा

*कूटशब्दाः भर्तृहरिः, कालशक्तिः, वाक्यपदीयम्, भारतीयवाङ्मयम्।*

***व्याकरणादर्शनस्य अन्यतमग्रन्थस्य प्रणेता भर्तृहरिः वाक्यपदीये कालस्य विवेचनम् अतीव चारुतया प्रस्तौति। कालस्यावधारणा योगवाशिष्ठप्रभृति अनेकेषु ग्रन्थेषु प्राप्यते। प्रस्तुते शोधपत्रे वाक्यपदीयदृशा कालस्य विवेचनं वर्तते खलु।***

कालस्य परिचर्चा भारतीयवाङ्मये सर्वत्रोपलभ्यते। अनया एव परिज्ञायते यत् कालस्य सत्तायाः परिचायकं खलु जगदिदम। निरुक्ते गत्यर्थे पठितोऽस्ति शब्दोऽयम। कालः कालयतेर्गतिकर्मणः।[1]

पाणिनीयधातुपाठेऽपि कल शब्दसंख्यानयोः, कल क्षेपे, कल गतौ संख्याने इति धातुत्रयेण कालशब्दः सिद्धयति। कल + णिच् + अच् इत्थं कालशब्दस्य व्युत्पत्तिः सम्भवति व्याकरणप्रक्रियापद्धत्या।

क्षीरस्वामी कालपरिचर्चाभिधाने वर्णयन् कथयति–कलयत्यायुः कालः।[2] अनेन परिज्ञायते यत् काल एवास्माकमायुर्निधारयति। स एव क्षण–पक्ष–मास–सम्वत्सराद्यभिधेयको भवति।

स कलाः कलयन् सर्वाः कालाख्यां लभते विभुः।[3]

काल एव सर्वस्य कारणोऽस्ति। तेनैवोत्पत्तिस्थितिप्रलयादीनि सम्भवन्ति। अतो भारतीयदर्शने ब्रह्मणः स्वातन्त्र्यशक्तिरूपत्वे कालः परिदृश्यते। यथोक्तं भर्तृहरिणा ब्रह्मकाण्डे–

**अध्याहितकलां यस्य कालशक्तिमुपाश्रिताः।**
**जन्मादयो विकाराः षड्भावभेदस्य योनयः॥** [4]

### वेदेषु कालशक्तिः

वेदाः भारतीयपरम्परायाः प्राणरूपाः सन्ति। अतः स्वतः प्रमाणरूपत्वे तेषामभिव्यञ्जनं विद्वत्परिषत्सु उपजृम्भते। वैदिकार्षयः ऋतनाम्नी एका शक्तिरकल्प्यन्त। या सार्वभौमिकी सर्वनियामिका च आसीत। तस्याः स्वामीरूपे ऋतावां (वरूणं) संस्थापयन् सूर्यचन्द्रमसादीनाम् अन्वेक्षणं कर्तुं तमयोजयन्त।

ISSN 976-8645

**वेदमासो धृतव्रतो द्वादश प्रजावतः।**

**वेदा य उपजायते॥**[5]

ऋग्वेदे कालशक्त्यादिस्त्रोतं सन्निहितमस्ति। उक्तञ्च पुरुषसूक्ते–

**पुरुष एवेदं सर्वं यद्भूतं यच्च भाव्यम्।**[6]

अथर्ववेदीयकालसूक्तः सर्वाधिकप्रसिद्धोऽस्ति कालसत्तापरिज्ञानार्थम। तत्रोक्तमस्ति यत् काले एव सर्वं निहितम्। तद्यथा–

**काले भूतिमसृजत् काले तपति सूर्यः।**

**कालो ह विश्वा भूतानि काले चक्षुर्विपश्यति॥**[7]

सम्पूर्णवाङ्मयेऽपि यथा–पुराणेतिहासोपनिषदारण्यकदर्शनसाहित्येषु कालस्य विभिन्नस्वरूपाणां सविस्तृता परिचर्चा कृतास्ति। उक्तञ्च नीतिशतके–

**दिक्कालाद्यनवच्छिन्नानन्तचिन्मात्रमूर्तये।**

**स्वानुभूत्येकमानाय नमः शान्ताय तेजसे॥**[8]

**अद्वैतदर्शने कालशक्तिः**

हेलाराजोऽद्वैतमतमुल्लेखयन् ब्रह्मतत्त्व क्रमराहित्यं प्रदर्शयति। परन्त्वविद्यावशात् क्रमरूपे तस्य विवर्तरूपः संजायते। तथा च स विवर्तो देशकालयोर्भवति। किमपि वस्तु आदौ कस्मिंश्चिद् देशे काले वा भवति। कालस्य काऽपि यथार्थसत्ता नास्ति। कालः ब्रह्मण्वध्यारोपिता प्रातिभासिका सत्ता वर्तते। कालाधारितानि यानि भेद–प्रभेदानि कृतानि सन्ति तानि सर्वाण्यविद्याजनितानि सन्ति। विद्याविर्भूते सति सर्वे प्रपञ्चा विलीयन्ते। तदा कालस्यापि विलयं संजायते। अतः कालविषयकं युक्तायुक्तविचारपुरस्परं प्रकट्यतेदं यत् प्रयासमात्रोयं न यथार्थः।[9]

**व्याकरणदर्शने कालशक्तिः**

पाणिनीयव्याकरणं खल्वकालकम्। यतोहि लोकात् कालपरिज्ञानात् कालः सिद्धः। यथोक्तम्–

**पाणिन्युपसंज्ञकमकालकं व्याकरणम्।**[10]

पतञ्जलिः कालविषये विभिन्नं मतं प्रदर्शयति। क्वचिद् क्रियारूपे, क्वचित् सत्तारूपे, क्वचित् सक्रमः, क्वचित् क्रमविरहित इति। कालं परिभाषयन् भाष्यकारः कथ्यते–

**येन मूर्तीनाम् उपचयाश्चापचयाश्च लक्ष्यन्ते तं कालमित्याहुः।**[11]

नागेशः क्रियामेव कालो मन्यते। पक्षोऽयं सदोषः। यतोहि नागेशः क्षणसत्तां पूर्वममन्यत्। क्षणस्तु क्रियासन्ताने संलग्न एवातः क्रियाभेदाय कालस्य सहाय्यमनिवार्यमस्ति।

ISSN 976-8645

**भर्तृहरेः कालशक्तिः**

भर्तृहरिः कालं शक्तिविशेषं परिगणयति। तस्यानुसारं कालः स्वतन्त्रशक्तिरस्ति। तामेवाश्रित्य जन्मादयः षड्भावविकाराः जायन्ते। याभिः जगदिदम् मूर्तरूपत्वे सम्भावितं भवति।

**काल एव हि विश्वात्मा व्यापार इति कथ्यते।**[12]

कालशक्तिः लोकयन्त्रस्य सूत्रधारोऽस्ति। यथा सूत्रधारो नेपथ्ये स्थितेऽपि मञ्चस्थनायकान् निर्देशयति पूर्वापरक्रमसंयोजनमपि करोति तथैव कालोऽपि जगति प्रत्येकं वस्तु उत्पादयति सत्वरजस्तमस्मिश्रणपूर्वकं तान् मूर्तत्वमपि यच्छति। सर्वं खलु तेनैवाभिजायते। अतः जहद्व्यापारः कालेन प्रेरितः।

**सहकारिणी शक्तयः**

भर्तृहरेर्मतानुसारं कालशक्त्या बहव्याः सहकारिण्यः शक्तयः सन्ति। वाक्यपदीये प्रतिबन्धशक्तिरभ्यनुज्ञाशक्तिः क्रमशक्तिः समवायशक्तिर्जराख्याशक्तिश्च उल्लेखिताः सन्ति। एतासां प्रथमद्वये महत्वपूर्णे स्तः।

**प्रतिबन्धाभ्यनुज्ञे शक्ती**

कस्यापि क्रियायाः साधनशक्तीनां व्यापारस्य विघातः प्रतिबन्धः कथ्यते। तस्य व्यापारस्य परिचालनञ्चाभ्यनुज्ञा कथ्यते। विघातपरिचालनयोर्व्यापारः सर्वत्रैव दृश्यते। यथा–एकस्मिश्चिंद् वृक्षे पूर्वं किसलयस्याभ्यनुज्ञा पल्लवस्य च प्रतिबन्धो भवति। तदनन्तरं किसलयस्य प्रतिबन्धः पल्लवस्य चाभ्यनुज्ञा भवति। भावानां स्थगनम् उन्मज्जनञ्चम जन्ममरणौ वैताभ्यां शक्तिभ्यां परिचालितौ भवतः। पौर्वापर्यस्य ज्ञानमावयोरेव क्रियास्ति। कालः प्रतिबन्धाभ्यनुज्ञाभ्यां विश्वं विभजते।

**प्रतिबन्धाभ्यनुज्ञाभ्यां तेन विश्वं विभज्यते।**[13]

भर्तृहर्यानुसारं यदि प्रतिबन्धाभ्यनुज्ञे स्वव्यापारं न कर्तुं शक्नुयाताम् तदा भावानां युगपदुत्पत्तिः प्रभवति, बीजाङ्कुरनालकाण्डादिषु पौर्वापर्यक्रमविच्छेदं न भवितुं शक्यते। सर्वत्रञ्च व्यवस्था व्यतिकीर्येरन्। सर्गस्थितिप्रलयञ्चापि कालकृत् प्रतिबन्धाभ्यनुज्ञावशाद् भवति।

**जराख्याक्तिः**

कालो जरारूपत्वेऽऽगत्य जनानां शैशवयौवनस्थित्याद्यवस्थानां अपचयं करोति। चराचरजगदिदं जरयैव विघटितमस्ति।

**जराख्या कालशक्तिर्या शक्त्यन्तरविरोधिनी।**
**सा शक्तिं प्रतिबध्नाति जायन्ते च विरोधिनः॥**[14]

स्थितभागस्य हेतुर्जराख्याशक्त्या पलायते भावेषु च कार्यकारिता शक्तिः प्रक्षीणा भवति।

ISSN 976-8645

**क्रमशक्तिः**

ययोपसंहृतवस्तुः स्वावयवेषु पुनाभिव्यञ्जते सा शक्तिः क्रमशक्तिः कथ्यते। ब्रह्मकाण्डे शब्दशक्त्युल्लेखयन् भर्तृहरिः क्रमशक्तिं वर्ण्यते। अन्तःकरणस्थेषु शब्देषु शब्दानां विभागाः प्रत्यस्तमिता भवन्ति। अवयवानां क्रमावभासने क्रमशक्त्या एव मुख्यकार्यमस्ति। क्रमस्योदयमस्तञ्च तस्या द्वे क्रिये स्तः। क्रमो मुख्यतः क्रियाया धर्मोस्ति, परन्तु क्रियाऽपि कालसम्बन्धत्वादेव स्वरूपं विदधति। अतः काले क्रमो विद्यते। भावाः सततपरिणामिनो भवन्ति। तेषु सदा परिवर्तनं भवत्येव। परिवर्तनस्य कारणं क्रम एव अस्ति। काल एव क्रमरूपेऽवतरति। उक्तञ्च–

**प्रतिबन्धाभ्यनुज्ञाभ्यां वृत्तिर्या तस्य शाश्वती।**
**तया विभज्यमानोऽसौ भजते क्रमरूपताम्॥**[15]

**समवायशक्तिः**

समवायशक्तिर्जन्मादिक्रियाप्रसंगे विश्लेषणार्थं व्यवहृता। या कारणकार्ययोर्भेदानां तिरोधानं संयच्छ्याभिन्नत्वञ्च प्रकटयति सा समवायशक्तिः। भर्तृहर्यानुसारं विशिष्टकालसम्बन्धात् परिपाकप्राप्तशक्तिषु नित्य-क्रियाभिव्यक्ता भवति। सामान्यभूतप्रवृत्तिः क्रिया। परमाणुषु कार्यजनकशक्तयाभिमुखत्वेन परस्परं संश्लेषो भवति मूलतत्त्वे प्रेरणामयकर्मविशेषमभिव्यञ्जते वा। कस्याश्चिद्धुतशक्त्या फलाभिव्यक्तिर्भवति। फलाभिव्यक्त्यां तेषां कारणे चैकत्वबुद्धिः समवायशक्तया एव संभवति।

**स्वातन्त्र्यशक्तिः कर्तृशक्तिश्च**

वाक्यपदीये स्वातन्त्र्यशक्तिकर्तृशक्त्योर्मध्ये नास्ति कोऽपि विभेदः। ब्रह्मणः कर्तृशक्तिः क्रमत्वं प्राप्य कालशक्तिरूपं भजते। भर्तृहरिणा स्वातन्त्र्यशक्तिरेव कर्तृशक्तिरूपे गृह्यते।

**अध्याहितकलां यस्य कालशक्तिमुपाश्रिता।**[16]

**कालशक्तिसमीक्षणम्**

भर्तृहरेः कालशक्तिः काश्मीरशैवागमे गृहीतायाः कालशक्त्याः साम्यतां भजते। यथा भर्तृहरिः कालं द्रव्यं न मनुते तथैव शैवागमेऽपि न कालं द्रव्यं परिगणितम्। वाक्यपदीये क्रमः कालधर्मोऽस्ति तथैव तत्राऽपि क्रमः कालस्य धर्मो वर्तते। क्रमाभिभासिका ब्रह्मणः कालशक्तिः। वाक्यपदीयस्था स्वातन्त्र्यशक्तिः शैवागमे वर्णिता कालशक्तिश्च साम्यते भजेते। कश्चिद् भिन्नतास्ति चेत् शैवागमे कालशक्तिः संचरति विभिन्नरूपेषु, किन्तु विषयेऽस्मिन् मौनं खलु हरिः। अपरमन्तरं विद्यते यत् शैवागमे तस्याः सम्बन्धः परावाचा साकमस्ति, वाक्यपदीये च परावाचः सत्तैव नास्ति। एतस्याः स्वातन्त्र्यशक्त्याः स्रोतं कुत्रास्ति? महाभाष्ये तु अस्ति एव न तथा च शैवागमलेखका भर्तृहरितः परवर्तिनः सन्ति, किन्तु न खल्वेतद् भर्तृहरेः मौलिकचिन्तनमपितु कस्मिंश्चिदागमे सम्भाव्यतेऽवश्यम्।

ISSN 976-8645

**कालविषयकं मतान्तरम्**

कालविषयेऽनेकानि मतान्तराणि वर्तन्ते तानि दर्शनार्थं भर्तृहरिवाक्यपदीये निगद्यते–

शक्त्यात्मदेवतापक्षैर्भिन्नं कालस्य दर्शनम्।

प्रथमं तदविद्यायां यद्विद्यायां न विद्यते॥

कारिकायामस्यां ब्रह्मणः स्वातन्त्र्यकालशक्त्या वर्णनपुरस्सरं मतान्तरं समुदर्शयन् भर्तृहरिः कथ्यते–परमात्मा काल इति गीतासु श्रीकृष्णस्य मतं भावावभासोपपादितः क्रमावभासोपपादितः काल इति केषाञ्चिद् मतम्, महतीदेवता विग्रष्वती शक्तिः काल इति केषाञ्चिद् मतम्, अहोरात्रसंध्यादिरूपः कालखण्डोऽपि तद्देवतारूप इति केचिद् वदन्ति।

**कालस्य नित्यत्वं विभत्वमेकत्वञ्च**

कालो विभुरस्ति। परापरस्य, चिरक्षिप्रयोर्ज्ञानं सर्वं सर्वत्र समानमेव भवति। अतः कालो व्यापकः। कालोऽमूर्त्तोऽसकृतकत्वात्। अतः स नित्योऽस्ति। काल एकोऽस्ति। तस्य भेदास्तु कल्पिताः।

नित्य हि कालनक्षत्रे।[18]

कालस्य नित्यत्वैकत्वे च संशयमुपजायते। पाणिनि उकालोऽज्झ्रस्वदीर्घप्लुतः सूत्रेऽस्मिन् शब्दतत्त्वस्य नित्यत्वात् कालकृद् भेदाय भेदाभानेऽपि ह्रस्वादौ अपि सुपरिचितः कालभेदास्तर्हि ह्रस्वदीर्घप्लुतावृत्या नालिकासलिलादिस्रुतिषु कथं प्रचयाऽपचययोगः स्याद् इत्याह भर्तृहरिः–

**ह्रस्वदीर्घप्लुतावृत्या नालिकसलिलादिषु।**

**कथं प्रचययोगः स्यात् कल्पनामात्रहेतुकम्।।**[20]

महाभाष्येऽपि द्रुता–मध्यमा–विलम्बितावृत्तीनां प्रसंगे कालभेदं वर्णितम् अस्ति। कालः नित्योऽस्ति। किन्तु प्रश्नमुपैति यत् कथं कालः नित्यो भवितुं शक्यते? भाष्ये वर्णितं वर्तते यद् ह्रस्वोच्चारणे नालिकायन्त्राद् जलविन्दवोऽल्पस्रवन्ति। दीर्घोच्चारणे ताभिरधिकम्। प्लुतोच्चारणे ततोऽधिकं जलस्रावणं भवति। अत्र 9:12:16 आनुपातिकं सम्बन्धोऽवमन्तुं शक्यते। ततो भ्रमो जायते यदयं काल्पनिको कालभेदस्तदा ह्रस्वादिभेदकल्पनाऽऽधृत्य नोचितम्। यतोहि सलिलस्रुतिः सत्ता यथार्था। कल्पितस्य यथार्थेन सहान्वयोऽसम्भवः। ह्रस्वादयः स्वभावतो भिन्नभिन्नकालवन्तः सन्ति। फलतः शब्दनित्यत्वे व्याघातं भवति। काठिन्यमिदं समादधति भर्तृहरिः– शब्दतत्त्वमभिन्नमस्ति, प्रचिताप्रचितं वा नास्ति। अभिव्यक्तिनिमितिका ध्वनिकृत्कालभेदः शब्देऽऽआभासितो भवति। प्राकृतध्वनयः स्वगतकालभेदं शब्देऽपि अध्यारोपयन्ति। इत्थं शब्दस्य नित्यत्वे न काठिन्यं भवति।

नागेशोऽपि कालस्य नित्यत्वं न स्वीकरोति। कालस्य कार्याधिकरणे व्यवहारं भवति परन्तु कालेऽपरिच्छिन्नसूर्यादिक्रियाया उपाधित्वमसम्भवम्। यदि सूर्यादिक्रियामन्यक्रियायाः परिच्छिन्नं स्वीकरणे

ISSN 976-8645

सति अवस्थादोष आगच्छति। अत: कालो नित्योऽखण्डो विभुश्च न भवितुं शक्यते। कालं यदि नित्यं मनुते चेत् प्रवाहनित्यतारूपे एव नित्य:। एकत्वकथने सति समूहरूपे एव।

भर्तृहरिस्तु कालं नित्यो मनुते–

**न नित्य: परमात्राभि: कालो भेदमिहार्हति।**[22]

प्रश्नोऽयमत्रसमुपजृम्भते यदि कालो नित्यश्चेत् कथं पौर्वापर्याभाव: ? तस्य निराकरणमस्ति–महिमैषा कालशक्त्या यद् एको भूते सति क्रमरूपे प्रतिभासते। बौद्ध–वेदान्तयो: क्रममीमांसा उल्लिखितात्र हरिणा।

**कालभेद:**

कालस्य कोऽपि रूपो भवेत, शाब्दव्यवहारे स भिन्नरूपे एव दृश्यते। व्याकरणदर्शने कालस्वरूप: शाब्दव्यवहारे परिलक्षित:। फलतो व्याकरणदर्शने विहित: कालो वर्तमानभूतभव्यादिरूपत्रये विभजते।

**क्रियोपाधिश्च सन् भूतभविष्यद्वर्तमानता।**
**एकादशभिराकारैर्विभक्ता: प्रतिपद्यते॥**[23]

**क्रय: कालशक्तय:**

कार्यभेदेन कारणभेदमनुमीयते। शक्तिभेदाद् कार्यभेद: सम्भव:। कालशक्त्याश्रिता भवन्ति भावा:। तेषामुन्मीलनं निमीलनं, दर्शनं तिरोधानञ्चानयैव भवति। अस्यां द्वे–आवरणात्मिके स्त:, एका प्रकाशिका च अतीतानागतौ च भावान् आवृयेते। वर्तमान: प्रकाशते च। अनागत:–आवरक: सन् वर्तमानस्याप्रतिबन्धक:, यतोहि अनागत एव वर्तमानरूपे प्रकट्यति। अतीतो वर्तमानविरोधी अस्ति, यद् गतं न पुन: आगच्छति, नष्टं चेत् न पुनर्जायते।

**एकस्य शक्तय: तिस्त्र: कालस्य समवस्थिता:।**
**यत्सम्बन्धेन भावानां दर्शनादर्शने सताम्॥**
**द्वाभ्यां स किल शक्तिभ्यां भावानां वरणात्मक:।**
**शक्तिस्तु वर्तमानाख्या भावरूपप्रकाशिनी॥**
**अनागता जन्मशक्ते: शक्तिरप्रतिबन्धिका।**
**अतीताख्या तु या शक्तिस्तया जन्म विरुध्यते॥**[24]

हरिणा परिणामवादानुसारिणि शक्तिर्वर्णिता। यथा सत्त्वरजस्तमस: सार्धं निवसन्ति तथैवावरक–प्रकाशगुणयुक्ता: शक्तयोऽपि विरुद्धस्वभावयुक्ता: सन् परस्परं सहाय्येन भावानां भेदं प्रकाशन्ते।

**धर्मास्तु त्र्यध्वान:।**

धर्मी स्थायी भवति धर्मश्चातीतानागतवर्तमानरूपेषु प्रकाशते। कार्यस्य प्रत्यक्षो वर्तमान: अदर्शनोऽतीत:। हेतोरर्थक्रियाचेष्टाऽनागत:। उपाधिभेदेन शक्तीनां पृथकत्वं भवति न तु सांकर्येण।

ISSN 976-8645

हेलाराजानुसारं ब्रह्मदर्शने शक्तिरूपकालस्य त्रिगुणात्मकः परिणामो भवति। जीवात्मनि ज्ञान-क्रिया-शक्तयो गुणत्रयं वर्तते। क्रियाधारितः कालभेदो भवति-इति व्याकरणदर्शने सुस्पष्टः।

तस्याभिन्नस्य कालस्य व्यवहारे क्रियाकृताः।

**वर्तमानकालः**

वाक्यपदीये वर्तमानकालस्य वर्णनं भाष्यपद्धत्या कृतमस्ति। पतञ्जलेः प्राक् वर्तमानविषये कश्चिद् विप्रतिपत्तय आसन्। यासां निराकरणं कात्यायनेन कृतम्। पतञ्जलिनाऽपि च समादधत। अन्येषु च दर्शनेषु वर्तमानोपरि विवेचनमस्ति।

**एष नाम न्याय्यो वर्तमानः कालः यत्रारम्भोऽनपवृक्तः।**[23]

केचन् मन्यन्ते यत् कालो द्विविधं भूतं भव्यञ्च, वर्तमानस्तु भवत्येव न। कोऽपि पदार्थः सद् भवति, असद् वा नान्यद् कापि अपरा श्रेणिः। यद् व्यतीत तद् भूतं, यद् नागतम् तदनागतम् (भव्यम्) अतः वर्तमानस्य तु सत्ता एव नास्ति।

उपर्युक्तानामाक्षेपाणां निराकर्तुं कथ्यते यद् देवदत्तस्य एकस्थानाद् अन्यत्र गमने सति कश्चिद् हेतुर्वर्तते ननु। तद् गमनेव। गमनमेव तस्य एकस्थानादन्यत्र गमने निमित्तमस्ति। गमनक्रियाया आलम्बत्वात्-गच्छति एवं ज्ञानमाबाधितरूपे व्यक्तं भवति। अतः क्रियाया अपि सत्त्वमस्ति। पुनः सत्त्वमेव न वर्तमानतालक्षणं तु प्रारब्धापरिसमाप्तत्वमस्ति। क्रमरूपे समूहस्य या विद्यमानत्वमस्ति तद् वर्तमानम्।

**क्रियाप्रबन्धरूपं यदध्यात्मं विनिगृह्यते।**
**सङ्क्रान्तबिम्बमेकत्र तामाहुर्वर्तमानताम्॥**[28]

**द्विविधं वर्तमानम्**

भर्तृहर्यानुसारं द्विविधं वर्तमानम्। प्रथमं मुख्यं यत् प्रारब्धापरिसमाप्त्यर्थे भवति। अपरं वर्तमानसामीप्ये वर्तमानवद्वा इति सूत्रेण भूतभविष्यदर्थे भवति। कदाचित् क्रियापरिसमाप्ते सति क्रियासंस्कारः शिष्यते। तदा भूतविषयकं वर्तमानसामीप्यं भवति। भविष्यद् विषयकं वर्तमानसामीप्यं तत्र भवति यत्र भविष्यत्क्रियाया मानससंकल्पेन वर्तमानत्वं भवति वैकल्पिकमिदं वर्तमानरूपम्। आशंसार्थेऽपि वैकल्पिकं वर्तमानं भवति। अप्राप्तस्य प्रियार्थस्य प्राप्त्यर्थमिच्छाशंसा। यद्यपि प्रार्थनैच्छयोर्वा वर्तमानं संबद्धयते परन्तु आशंसाविषये तु भव्यमस्ति। उक्तञ्च महाभाष्ये-

**आशंसानाम भविष्यत्काला।**[30]

वस्तुतस्तु आशंसा प्रयोक्तृधर्माऽस्ति। न सा शब्दार्थः। पुनरपि स्व शब्दसंस्कारे निमित्ता भवति। न केवलं वर्तमानविषयेऽपितु भूते भव्ये चापि आशंसा प्रयोगं दृश्यते। कालत्रयेषु आशंसा प्रयुञ्जते। गच्छ हन्यते कंसः। गच्छ घनिष्यते कंसः। किं गते हतः कंसः। क्रियावयवाः बहवः।

ISSN 976-8645

शब्दाधृत्य समूहस्य क्रियाया येनेऽवयवेन सम्बद्धो भवति तस्मिन्नेव परिसमाप्तिरपि भवति। कालत्रयेण सह सम्बद्धत्वात् क्रियाया अपि कालत्रयेण योगमुपपन्नं भवति।

**भूतकालः**

यस्य स्वसत्ता परिसमाप्ता भवति तद् भूत शब्देन व्यवहृयते।

**यस्य स्व-सत्ता व्यपवृक्ता तत्सर्वं भूतशब्देनोच्यते।**[31]

कदाचित् स्वल्पसत्ता परिसमापनेऽपि भूतं भवति। उत्पन्नानन्तरं ध्वंसयन् क्रियोपाधिरूपे भूतं प्रयुञ्जते। हर्याभिमतं भूतं पञ्चविधं भवति। सामान्यम्, अद्यतनम, अनद्यतन्म्, अद्यतनानद्यतनं, भविष्यत्यारोपितञ्च।

**भविष्यत्कालः**

भविष्यच्चतुर्विधं भवति। सामान्यमद्यतनमनतनमद्यतनानद्यतनञ्च भविष्यत्प्रसंगे निष्पत्ति-सिद्धयोर्मध्ये भेदप्रदर्शयन् कथ्यते भर्तृहरिः-

**निष्पत्तावधिः कश्चित् कश्चित् प्रतिविवक्षितः।**
**हेतुजन्मव्यपेक्षातः फलजन्मेति चोच्यते॥**
**अबहिस्साधनाधीना सिद्धिर्यत्र विवक्षिता।**
**तत् साधनान्तराभावात् सिद्धमित्युपदिश्यते॥**[32]

भर्तृहरिः अवबोधभेदाद् भूतभविष्यद्वर्तमानादीनां प्रयोगोऽपेक्षते। हरिः सर्वत्र कालत्रयं मन्यते। प्रसंगेऽस्मिन् तस्य सत्ता दर्शनमस्ति। मार्गे कूपमस्ति, यः पश्यति तस्मै प्रत्यक्षं तत्र वर्तमानकालस्य सत्ताऽस्ति। यो अपश्यत् तस्मै भूतसत्ता। यो द्रक्ष्यति तदर्थं कूपस्य भविष्यत्सत्तास्ति। इन्द्रियसन्निकर्षापकर्षाभ्यां सत्ता भिन्ना व्यपदेशिकास्ति।

**सत्तामिन्द्रियसम्बन्धात् सैव सत्ता विशिष्यते।**
**भेदेन व्यवहारो हि वस्त्वन्तरनिबन्धनः॥**
**अस्तित्वं वस्तुमात्रस्य बुद्धया तु परिगृह्यते।**
**यः समासादनाद् भेदः स तत्र न विवक्षितः॥**[33]

वाक्यपदीये एकादशविधः कालभेदो निरूपितं वर्तते-

**भूतः पञ्चविधस्तत्र भविष्यंश्च चतुर्विधः।**
**वर्तमानो द्विधाख्यात इत्येकादश कल्पनाः॥**[34]

अन्येऽपि मृग-शकुन्तरुतादिभिः कालो निरुप्यते। कथ्यते च-

**रुतैर्मृगशकुन्तानां स्थावराणां च वृत्तिभिः।**
**छायादिपरिणामैश्च ऋतुधामा निरुप्यते॥**[35]

ISSN 976-8645

जम्बूक प्रभृतीनां मृगाणां हंसपिकादीनाञ्च शकुन्तानां शब्दैः स्थावराणां वृक्षलतादीनां नव-नवपुष्प-किसलयोद्भेदादिरूपाभिः छायातापादिरूपैः तमसूर्यादीनां परिणामैश्च ऋतुधामा कालो निरुप्यते। जम्बूकरुतैविज्ञायते कियति रात्रिर्व्यतीता। कुक्कुटानां रूतैर्ज्ञायते यत् प्रभातो जातः। आम्रवृक्षेषु मञ्जरीदर्शनाद् द्राक्षालतासु च नवपल्लवमञ्जरीदर्शनाद् ज्ञायते यद् गतः शिशिरः आगतो वसन्तः। पादलग्नया निजच्छायया मध्याह्नकालो विज्ञायते। ललाटं तपेनातपेन ग्रीष्मो विज्ञायते। तथा च ऋतवोधाम स्थानं यस्य तदात्मकत्वेन प्रतिभासात् कालाख्या हि स्वातन्त्र्यशक्तिर्ब्रह्मणो वसन्तादिभेदेन प्रविभक्ता भवन्ति। यथा चासौ नियतऋतुभेदः पुंसकोकिलादि कूजितवशेन नवनवकिसलययोगेन सूर्यादि सञ्चारविशेषोपलक्ष्यमाणच्छायाऽऽतपादिभेदेन लतावतानप्रसून विशेषेण चाऽवधार्यते।

**निष्कर्षः**

क्षण-पल-विपल-मुहूर्त्त-घटी-पक्ष-मास-अयन-ऋतु-संवत्सर-मन्वन्तर-युगादीनां विभागेनाऽपि कालो विभक्तोऽस्ति। दैवज्ञेन-आदित्यग्रहनक्षत्रराश्यादीनां सञ्चारेण कालस्यविभाजनं स्वीकृतमस्ति। वाक्यपदीये भर्तृहरिः कालविषयकं सम्पूर्णं मतमतान्तरमुद्धरति। भर्तृहरिः कालं स्वातन्त्र्यं शक्तिरूपे स्वीकरोति। पुनरपि विभागमिदं व्यवहारसौकार्यार्थं कृतमस्ति। विभागेदं कल्पितत्र तु यथार्थम्। वस्तुतस्तु कालो व्यापकोऽमूर्त्तोऽकृतकः स्वातन्त्र्यशक्तिश्चास्ति। ब्रह्मणः कालाख्या स्वातन्त्र्यशक्तिः भेदरहितं वर्तते-

विकल्परूपं भजते त्वमेवाविकल्पितम्।
न चात्र कालभेदोऽस्ति कालभेदश्च गृह्यते॥[36]

## अन्तटिप्पणी

1. निरुक्त, 2/25/1
2. अमरकोषः 1/1/59
3. वाक्यपदीयम्, 3/9/14
4. वाक्यपदीयम्, 1/3
5. ऋग्वेदसंहिता 1/25/8
6. ऋग्वेद संहिता, 10/90/2
7. अथर्ववेद संहिता, 19/53/6
8. भर्तृहरिनीतिशतकम्-1
9. वाक्यपदीयम्, 3/9/62

ISSN 976-8645


10. काशिका–2/4/21
11. महाभाष्यम्, 2/2/5
12. वाक्यपदीयम्, 3/9/12
13. वाक्यपदीयम्, 3/9/4
14. वाक्यपदीयम्, 3/9/24
15. वाक्यपदीयम्, 3/9/30
16. वाक्यपदीयम्, 1/3
17. वाक्यपदीयम्, 3/9/62
18. महाभाष्यम् 4/2/3
19. अष्टाध्यायी, 1/2/27
20. वाक्यपदीयम्, 3/9/64
21. महाभाष्यप्रदीपोद्योतम्, 2/2/5
22. वाक्यपदीयम्, 2/24
23. वाक्यपदीयम्, 3/9/37
24. वाक्यपदीयम्, 3/9/49/51
25. योगदर्शनव्यासभाष्यम्, 3/13
26. वाक्यपदीयम्, 3/9/48
27. महाभाष्यम्, 3/2/123
28. वाक्यपदीयम्, 3/9/90
29. अष्टाध्यायी, 3/3/131
30 महाभाष्यम्, 3/3/132
31. महाभाष्यम्, 2/2/84
32. वाक्यपदीयम्, 3/9/109–110
35. वाक्यपदीयम्, 3/9/112–113
34. वाक्यपदीयम्, 3/9/38
35. वाक्यपदीयम्, 3/9/45
36. वाक्यपदीयम्, 3/द्रव्य समु०/8

# सन्दर्भग्रन्थसूची

1. वाक्यपदीयम् संपा0–के वी0 अभ्यंकर एवं वी0 पी0 लिमये पूना,1965
2. वाक्यपदीयम्, तृतीयं काण्डम्, सरस्वती ग्रन्थमाला–91,वाराणसी,
3. अम्बाकर्त्री व्याख्या सहितम् 1979, खैस्त्राब्द
4. वाक्यपदीयम्, तृतीय काण्डम् संपा0– के0 ए0 सुब्रह्ममण्य अय्यर, प्रथम भाग
5. (अंग्रेजी अनुवाद) पूना,1971 (प्रथम संस्करण) काशिका संपा0–डा0 आयेन्द्र शर्मा
6. (प्रथमो भागः)–1–4 अध्याय संस्कृत परिषद् ग्रन्थावली–17 ,हैदराबाद 1969
7. महाभाष्यम् श्री काशी संस्कृत ग्रन्थमाला–153, वाराणसी, (प्रदीपोद्योतत्वालोकेविभूषितम्) 1984
8. त्रिपाठी, रामसुरेश संस्कृत व्याकरण दर्शन, दिल्ली–1972,प्र0 सं0
9. Abhyanker and shukla, J.J. A Dictionary of Sanskrit-Grammar,Oriental-Institute, Barode, 1977, 1961, Ist Ed.
10. Sharma Sarveshvara The Idea of power (sakti) in the Vakyapadiya, BhartiyaVidya Bhawan, 1980
11. Sharma, K.M.K. Panini Katyayana and Patanjali, Sanskrit Vidyapeeth, Prakashan Mala, Ist Edition, 1968